International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 159-160
© 2026 IJMH
www.themultijournal.com
Received: 25-05-2026
Accepted: 23-06-2026
Publish : 24-06-2026

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# शब्दस्य स्वतः प्रामाण्यम्

**प्रो. प्रभाकरप्रसादः**

अत्र लेखे प्रत्यक्षानुमानयोरतिरिक्तं शब्दप्रमाणं स्वीकार्यम्, तस्यापि स्वतःप्रामाण्यमिति बौद्धादिमतानां निराकरणपूर्वकं प्रतिपाद्यते। तथाहि बौद्धाः -

**प्रमाणद्वयसिद्धे च विषयद्वयवेदने ।**
**वद कस्यानुरोधेन तृतीयं मानमिष्यताम् ।।**[1]

ननु परोक्षे सामान्यात्मनि विषये एवानुमानमिव तृतीयं शब्दप्रमाणमपि प्रवर्ततामिति चेत् । उच्यते एकत्र विषये विरोधविफलत्वाभ्यामनेक प्रमाणप्रवृत्त्यनुपपत्तेरनुमानविषयतया नियते परोक्षे शब्दप्रमाणस्य नावकाशः। एवं ह्याहुः- **"अधिगतमर्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यादिति, अन्यरूपतया तु तदग्रहणमुत्तरप्रमाणेन दुःशक्यमादिमप्रमाणविरुद्धत्वात्, इत्यत एव न सम्प्लवमभ्युपगच्छन्ति नीतिविदः"** इति। एकस्मिन्विषयेऽनेकप्रमाणप्रवृत्तिः सम्प्लवः। स च प्रमाण्योः सम्प्लवः क्वापि न सङ्गच्छते। यतो हि अनधिगतार्थगन्तृप्रमाणमिति प्रमाणविदः प्रमाणलक्षणमाचक्षते। तदुक्तमाचार्यसुरेश्वरैः **"सर्वतीर्थदृशां तावत् सामान्यं मानलक्षणम्।"** अज्ञातार्थावगमनम् इति। तत्र पूर्व यदि प्रमाणेनैकेन ज्ञातं चेत् तत्र द्वितीयं प्रमाणमनुवादकमेव स्यात्, अन्यथा स्मृतिरपि प्रमाणं भवेत्। यदि चेन्द्रियेण समानविषयः शब्दो भवेत् तदान्धानन्धयोरविशेषप्रसङ्गः। तदाह-

**अन्यदेवेन्द्रियग्राह्यमन्यः शब्दस्य गोचरः।**
**शब्दात्प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते ।।**[2]

अयमस्य श्लोकस्यार्थः अन्यदेव स्वरूपादि स्वलक्षणमिन्द्रियग्रह्यम्, तस्मादन्यः शब्दस्य गोचरः, यतः शब्दात् प्रत्येति भिन्नाक्षः प्रध्वस्तनयनः; न तु भिन्नाक्षः प्रत्यक्षमीक्षते, समानविषयत्वे च अनन्धस्येवान्धस्यापि शब्दादपरोक्षैव प्रतिपत्तिः स्यादिति। एवं च स्वलक्षणात्मनि प्रत्यक्षे, सामान्यात्मनि परोक्षे च विषये शब्दस्यानवकाशात्, एतद्विविधातिरिक्ततृतीयविधस्य मेयसमूहस्य गगनकुसुमायमानत्वात्, तृतीयविषयासत्वपरिच्छेदस्य प्रत्यक्षमहिम्न एव सिद्ध्यतीति शब्दो न मानान्तरमिति सिद्धम्। तदित्थं संगृहीतं जयन्तभट्टैः-

**सम्बन्धग्रहणापेक्षमनुमानं स्वलक्षणे।**
**सजातीयविजातीयव्यावृत्ते वर्ततां कथम् ।।**
**प्रत्यक्षमपि सद्वस्तु संस्पर्शनियतव्रतम् ।**
**विकल्पारोपिताकारसामान्यग्राहकं कथम् ।।**
**यच्च शब्दोपमानादि प्रमाणान्तरमिष्यते ।**
**तदेवं सति कुत्रांशे प्रतिष्ठामधिगच्छतु ।।**
**वस्तु स्वलक्षणं तावत् प्रत्यक्षेणैव मुद्रितम्।**
**ततोऽन्यदनुमानेन सम्बन्धापक्षवृत्तिना ।**
**नानाप्रमाणगम्यश्च विषयो नास्ति वास्तवः॥ इति ॥**

अत्र प्रथमं श्लोकद्वयेन प्रत्यक्षानुमानयोः स्वस्वनियतविषय एव प्रवृत्तिः समर्थिता। प्रमाणसंम्पलवनिराकरणमपि सूचितम्। तृतीयादिश्लोकैः परोक्षव्यतिरिक्ततृतीयमेयराशेरभावात् शब्दो न मानामिति प्रतिपादितम्। एवं शब्दप्रमाणे निराकृते सति कथं शब्दादर्थप्रतिपत्तिरिति शङ्का बौद्धमते जागर्ति। ततसमाधानं बौद्धैरेवमभिधीयते न शब्दादेव केवलादर्थसमधिगम; किन्त्वर्थे-नानुबन्धवतो लिङ्गादिति। तदुक्तम्-

**प्रत्यक्षमनुमानं च प्रमाणे सदृशात्मना ।**

**अप्रत्यक्षस्य सम्बन्धादन्यतः प्रतिपत्तितः।।[3]**

अप्रत्यक्षस्यार्थस्य प्रत्यक्षादन्यतः इति। दीपिकाकाराभिप्रायानुसारेणे श्लोकस्य व्याख्या प्रतिपत्तितः सदृशात्मना=सामान्यद्वारेण प्रतिपत्तितः, अन्यतः प्रतिपत्तितः सम्बन्धत् प्रतिपत्तितः प्रत्यक्षमनुमानं च प्रमाणे। न तदतिरिक्तं प्रमाणान्तरमस्तीत्यर्थः। अत्र सदृशात्मना प्रतिपत्तित इति सामान्योपाधौ बोधकत्वम्, अप्रत्यक्षस्य प्रतिपत्तित इति त्रैकाल्यविषयत्वम्, सम्बन्धात् प्रतिपत्तित इति सम्बन्धज्ञानापेक्षया बोधकत्वम्, अन्यतः प्रतिपत्तित इति प्रत्यक्षेतरमानत्वं चोक्तानि। ग्रन्थकारैः प्रकाशात्मयतीन्द्रैः पूर्वश्लोकोक्तानि साधनान्येवं विभज्य प्रदर्शितानि-

**१. शाब्दी बुद्धिरनुमा सामान्यद्वारेण बोधकत्वात्। धूमादग्निज्ञानवत्।**

**२. शाब्दी बुद्धि; अनुमा प्रत्यक्षादन्यप्रमाणत्वात्। धूमादग्निज्ञानवत्।**

**३. शाब्दी बुद्धिः अनुमा त्रैकाल्यविषयत्वात् । धूमादग्निज्ञानवत् ।**

**४. शाब्दी बुद्धिः अनुमा सम्बन्धज्ञानसापेक्षत्वात्। धूमादग्निज्ञानवत्।[4]**

इति। प्रथमानुमाने सामान्यद्वारेण बोधकत्वं हेतुः। सामान्यं च जातिः। जात्युपधानेन व्यक्तिधीजनकत्वमिति तदर्थः। यथा धूमादीनि लिङ्गानि वह्नित्वादिजात्युपधानेन वह्निविशेषसाधनानि तथा गवादिशब्दा गोत्वादिजात्युपधानेन गवादिव्यक्तिधियं जनयन्ति, अतः शब्दो नानुमानाद् भिद्यत इत्यर्थः। नन्वेतद् बौद्धैः परार्थमनुमानं कृतम्, बौद्धमते तु जातिर्नाङ्गीक्रियते, परप्रसिद्धिमवलम्ब्य हेतूकरणं चानुपपन्नम् तदुक्तम्-

**परार्थमनुमानं च स्वदृष्टार्थप्रकाशनम् ।**

**आगमात् परदृष्टन्न साधनं नाप्यर्थतः ।।[5]**

अस्यार्थः स्वदृष्टस्यार्थस्य ख्यापनसमर्थ त्रिरूपलिङ्गाख्यानं परार्थानुमानम्। परार्थानुमाने च स्वयमनधिगतं परमतमात्रप्रसिद्धं साधनं न भवति। अत्यन्ताप्रसिद्ध खराविषाणादिकमवस्त्वपि साधनं न भवतीत्यर्थः। एवं स्थितौ कथं **"सामान्यद्वारेण बोधकत्वादिति"** हेतुः बोद्धोक्तः सङ्गच्छते ? उच्यते अयं गौरिति अनुगतप्रतीतिनिर्वाहार्थं तैरपि जातिः स्वीकृतैव। वस्तुसती जातिस्तु नाश्रिता किन्तु अन्यापोहरूपालीकनिर्भासानुवृत्तप्रत्ययवेदनीया जातिस्तेषामभिमतेति दर्शनान्तरेभ्यो विशेषः। एवञ्च पूर्वोक्तं फलितं शब्दो नानुमानाद्भिद्यत इति ।।

**शब्दः अनुमानात् पृथक् प्रमाणम्-**

अत्र समाधिरभिधीयते शब्दो नानुमानाद्भिद्यत इत्येतत्पूर्व-पक्षनिराचिकीर्षयैव शब्दविज्ञानाद् असन्निकृतेऽर्थे बुद्धिः शब्दी प्रमितिरिति स्वीक्रियते।

**स्वभावकार्य न स्यातां देशादिनियमोऽपि न।**

**नानुमा शक्तिसम्बन्धान्नेक्षते पक्षधर्मता ।। इति ।।**

निराकरणप्रकारश्चेत्थम्- शब्दोऽर्थस्यानुमापक इति तन्मतम्। अनुमापकं चाविनाभावापेक्षया गमकम्। अविनाभावप्रयोजकाश्च कार्यस्वभावानुपलब्धिलक्षणास्त्रयो हेतवः। तत्र कार्यं नाम तदुत्पत्तिसम्बन्धेन साध्यसाधको हेतुः यथा अग्निरत्र धूमात् । स्वभावो नाम स्वात्मनि साध्यधर्मे हेतुः यथा वृक्षोऽयं शिंशपात्वादिति। अनुपलब्धिर्नाम प्रतिषेधफलको हेतुः यथा इह प्रदेशे नास्ति घट; उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरिति।

अत्र शब्दार्थयोः कार्यकारणाभावाभावात् न कार्यलक्षणहेतुनिबन्ध-नोऽविनाभावः सङ्गच्छते। बाह्यार्थ एवं शब्दगोचर न तु विवक्षेति पूर्व प्रतिपादितत्वात्। नापि वृक्षत्वशिंशपात्वयोरिव तादात्म्याभावात् स्वभावलक्षणहेतुनिबन्धनोऽविनाभावः सङ्गच्छते। शब्दार्थयोर्भाव-रूपत्वाद- नुपलब्धिलक्षणहेतुनिबन्धनोऽप्यविनाभावो न समस्ति। नाप्यव्यवस्थिदेशकालत्वात्तयोः चन्द्रोदये समुद्रवृद्ध्यादाविव नियतदेशकालनिबन्धनोऽविनाभावः सम्भवति। एवं प्रकारेण शब्दार्थयोरविनाभावाभावेन अविनाभावेन बोधकत्वस्यानुमानप्रयो-जकस्याभावान्न शब्दोऽनुमानम्। अयमत्र प्रयोगः शब्दो नानुमानम्, अवनिभावानपेक्षया गमकत्वाच्चक्षुरादिवदिति। तथा च सामान्य-द्वारेण बोधकत्वादित्यादिहेतुकलापेऽविनाभावबलेन बोधकत्वमु-पाधिरुन्नेयः। सम्बन्धज्ञानसापेक्षत्वं च शब्दसंजल्पितसविकल्पके व्यभिचरति । तस्मात् सिद्धमेतत् शब्दोऽनुमानाद् भिद्यते इति।

**पाद टिप्पणी**

1 न्या.म.,२८

2 न्या.म.,२९.

3 श्लोकोऽयं वेदान्तकौमुद्यां श्रीरामाद्वयाचार्यैः उद्धृतः, व्याख्यातश्च। तदित्थं तेषां व्याख्यानम्- तत्र कौमुद्यां प्रमाणेऽसदृशात्मनेति पाठः। असदृशात्मना सम्बन्धादविना भावात्। अन्यतः प्रमाणान्तरादप्रत्यक्ष-स्यार्थस्य प्रतिपत्तितः इति द्वयं प्रमाणम्। अतः शब्दो नानुमानाद् भिद्यत इति। (वे. कौ. पृ. ६०२) मूलतो दिङ्नागकृतप्रभाकरविजय-ग्रन्थस्यायं श्लोकः।

4 श्लोकवार्तिके शाक्यादिभिरुक्ता हेतवः सङ्कलय्येत्थं प्रदर्शिताः- शब्दानुमानयोरैक्यं धूमादग्न्यनुमान्वत्। अन्वयव्यतिरेकाभ्यामेक-प्रत्यक्षदर्शनात्। सम्बन्धपूर्वकत्वाच्च प्रतिपत्तिरितो यतः।। प्रत्यक्षान्यप्रमाणत्वात् तददृष्टार्थबोधनात्। सामान्यविषयत्वाच्च त्रैकालविषयाश्रयात् ॥ इति ॥

5 शाब्दनिर्णयदीपिकात् एव उद्धृ